✧˖°*❋ ❋*°˖✧

# पति प्राप्ति – पार्वती स्तोत्रम्
# (Pati Prapti Parvati Stotra)

✧˖°*❋ ❋*°˖✧

# ॥ जानकीकृतं पार्वतीस्तोत्रम् ॥

जानकी उवाच:
शक्तिस्वरूपे सर्वेषां सर्वाधारे गुणाश्रये ।
सदा शंकरयुक्ते च पतिं देहि नमोऽस्तु ते ॥1॥

सृष्टिस्थित्यन्त रूपेण सृष्टिस्थित्यन्त रूपिणी ।
सृष्टिस्थियन्त बीजानां बीजरूपे नमोऽस्तु ते ॥2॥

हे गौरि पतिमर्मज्ञे पतिव्रतपरायणे ।
पतिव्रते पतिरते पतिं देहि नमोऽस्तु ते ॥3॥

सर्वमंगल मंगल्ये सर्वमंगल संयुते ।
सर्वमंगल बीजे च नमस्ते सर्वमंगले ॥4॥

सर्वप्रिये सर्वबीजे सर्व अशुभ विनाशिनी ।
सर्वेशे सर्वजनके नमस्ते शंकरप्रिये ॥5॥

परमात्मस्वरूपे च नित्यरूपे सनातनि ।
साकारे च निराकारे सर्वरूपे नमोऽस्तु ते ॥6॥

क्षुत् तृष्णेच्छा दया श्रद्धा निद्रा तन्द्रा स्मृति: क्षमा ।
एतास्तव कला: सर्वा: नारायणि नमोऽस्तु ते ॥7॥

लज्जा मेधा तुष्टि पुष्टि शान्ति संपत्ति वृद्धय: ।
एतास्त्व कला: सर्वा: सर्वरूपे नमोऽस्तु ते ॥8॥

दृष्टादृष्ट स्वरूपे च तयोर्बीज फलप्रदे ।
सर्वानिर्वचनीये च महामाये नमोऽस्तु ते ॥9॥

शिवे शंकर सौभाग्ययुक्ते सौभाग्यदायिनि ।
हरिं कान्तं च सौभाग्यं देहि देवी नमोऽस्तु ते ॥10॥

स्तोत्रणानेन या: स्तुत्वा समाप्ति दिवसे शिवाम् ।
नमन्ति परया भक्त्या ता लभन्ति हरिं पतिम् ॥11॥

इह कान्तसुखं भुक्त्वा पतिं प्राप्य परात्परम् ।
दिव्यं स्यन्दनमारुह्य यान्त्यन्ते कृष्णसंनिधिम् ॥12॥

**श्री ब्रह्मवैवर्त पुराणे जानकी कृतं पार्वती स्तोत्रं सम्पूर्णम् ॥**

≪ ◦ ❈ ◦ ≫

# ॥ Jānakīkṛtaṁ Pārvatīstotram ॥

**Jānakī uvāca:**

śaktisvarūpe sarveṣāṁ sarvādhāre guṇāśraye
sadā śaṁkarayukte ca patiṁ dehi namo'stu te ॥1॥

sṛṣṭisthityanta rūpeṇa sṛṣṭisthityanta rūpiṇī
sṛṣṭisthityanta bījānāṁ bījarūpe namo'stu te ॥2॥

he gauri patimarmajñe pativrataparāyaṇe
pativrate patirate patiṁ dehi namo'stu te ॥3॥

sarvamaṁgala maṁgalye sarvamaṁgala saṁyute
sarvamaṁgala bīje ca namaste sarvamaṁgale ॥4॥

sarvapriye sarvabīje sarva aśubha vināśinī
sarveśe sarvajanake namaste śaṁkarapriye ॥5॥

paramātmasvarūpe ca nityarūpe sanātani
sākāre ca nirākāre sarvarūpe namo'stu te ॥6॥

kṣut tṛṣṇecchā dayā śraddhā nidrā tandrā smṛtiḥ ksamā
etāstava kalāḥ sarvāḥ nārāyaṇi namo'stu te ॥7॥

lajjā medhā tuṣṭi puṣṭi śānti saṁpatti vṛddhayaḥ
etāstva kalāḥ sarvāḥ sarvarūpe namo'stu te ॥8॥

dṛṣṭādṛṣṭa svarūpe ca tayorbīja phalaprade
sarvānirvacanīye ca mahāmāye namo'stu te ॥9॥

śive śaṁkara saubhāgyayukte saubhāgyadāyini
hariṁ kāntaṁ ca saubhāgyaṁ dehi devī namo'stu te ||10||

stotraṇānena yāḥ stutvā samāpti divase śivām
namanti parayā bhaktyā tā labhanti hariṁ patim ||11||

iha kāntasukhaṁ bhuktvā patiṁ prāpya parātparam
divyaṁ syandanamāruhya yāntyante kṛṣṇasaṁnidhim ||12||

**śrī brahmavaivarta purāṇe jānakī kṛtaṁ pārvatī stotraṁ sampūrṇam ||**

✧˖°*❋ ❋*°˖✧

All types of mantra at: chalisapdf.net